टीकासारसुन्दरी ॥ कर्म्मविशेषे तासां नामान्तराणि यथा । हिरण्या १ कनका २ रक्ता ३ कृष्णा ४ सुप्रभा ५ बहुरूपा ६ अतिरक्ता ७ एताः सात्त्विक्यो यागकर्म्मणि । काम्यकर्म्मणि तु पद्मरागा १ सुवर्णा २ भद्रलोहिता ३ लोहिता ४ श्वेता ५ धूमिनी ६ करालिका ७ एता राजस्यः । क्रूरककर्म्मणि तु । विश्वमूर्त्तिः १ स्फुलिङ्गिनी २ धूम्रवर्णा ३ मनोजवा ४ लोहिता ५ कराला ६ काली ७ एतास्तामस्यः ॥*॥ एतासामधिष्ठातृदेवता यथा,—

"अमर्त्यपितृगन्धर्व्वयक्षनागपिशाचकाः ।
राक्षसः सप्तजिह्वानामीरिता अधिदेवताः ॥"

एतासां वर्णादिङ्नियमो यथा । गवेषविमर्षिण्याम् ।

"हिरण्या तप्तहेमाभा शूलपाणेर्दिशि स्थिता ।
वैदूर्य्यवर्णा कनका प्राच्यां दिशि समाश्रिता ॥
तरुणादित्यसङ्काशा रक्ता जिह्वाग्निसंस्थिता ।
कृष्णा नीलाभ्रसङ्काशा नैरृत्यां दिशि संस्थिता ।
सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता ।
अतिरक्ता जवाभासा वायव्यां दिशि संस्थिता ।
बहुरूपा यथा ख्याता दक्षिणोत्तरसंस्थिता ॥"

इति तन्त्रसारः ॥

सप्तज्वालः, पुं, (सप्त ज्वाला यस्य ।) अग्निः । इति हेमचन्द्रः ॥

सप्ततन्तुः, पुं, (सप्तभिर्भूरादिभिर्म्महाव्याहृतिभिरग्निजिह्वाभिर्वा तन्यते इति । तन विस्तारे + "सितनिगमीति ।" उणा० १।७० । इति तुन् । सप्त तन्तवः संस्था यस्येति वा ।) यज्ञः । इत्यमरः ॥ (यथा, माघे । १४ । ६ ।

"सप्ततन्तुमधिगन्तुमिच्छतः
कुर्व्वनुग्रहमनुज्ञया मम ।
मूलतामुपगते खलु त्वयि
प्रापि धर्म्ममयवृक्षता मया ॥")

सप्ततिः, स्त्री, (सप्त दशतः परिमाणमस्य । "पंक्तिविंशतित्रिंशदिति ।" ५।१।५९ । इति निपातनात् साधुः ।) सङ्ख्याविशेषः । सत्तोर इति भाषा । यथा,—

"नवतिर्योजनानाञ्च सहस्राणाञ्च सप्ततिः ।
यावद्घटिकमात्रेण तावच्चलति भास्करः ॥"

इत्यादित्यहृदयम् ॥

सप्ततितमः, त्रि, (सप्तति "तस्य पूरणे डट् ।" ५।२।४८ । इति डट् । "षष्ट्यादेश्चासंख्यादेः ।" ५ । २ । ५८ । इति डटस्तमडागमः ।) सप्ततेः पूरणः । सप्ततिशब्दात् पूरणार्थे मयट्प्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

सप्तदश, [न्] त्रि, (सप्ताधिका दश । सङ्ख्याविशेषः । सतरो इति भाषा । तत्संख्याविशिष्टः । यथा । एष वै सप्तदश प्रजापतिर्यज्ञे यज्ञे अन्वायत्तः । इति मलमासतत्त्वम् ॥ बहुवचनान्तोऽयम् ॥

सप्तदशः, त्रि, (सप्तदशन् + "तस्य पूरणे डट् ।" ५।२।४८ । इति डट् ।)सप्तदशानां पूरणः । यथा,

"ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥

सप्तदीधितिः, पुं, सप्त दीधितयो यस्य ।) अग्निः । इति त्रिकाण्डशेषः ॥

सप्तद्वीपपतिः, पुं, (सप्तानां द्वीपानां पतिः ।) सप्तद्वीपानामधिपतिः । यथा,—

"न मूल्यमादाद्धेम्यातः सभार्य्यश्चरिसंयुतः ।
सप्तद्वीपपतिर्ज्जातः सूर्य्यायुतसमप्रभः ॥"

इति तिथ्यादितत्त्वधृतमत्स्यपुराणम् ॥

सप्तद्वीपा, स्त्री, (सप्त द्वीपा यस्याम् ।) पृथिवी । यथा,

"मनोः स्वायम्भुवस्यासन् दशपुत्रास्तु तत्समाः ।
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
ससमुद्रा करवती प्रतिवर्षं निवेशिता ॥"

इति मार्कण्डेयपुराणम् ॥

तेषां नामादि द्वीपशब्दे द्रष्टव्यम् ॥

सप्तधा, व्य, (सप्तन् + धाच् ।) सप्तप्रकारम् । यथा,

सप्तवारानुपोष्यैव सप्तधा संयतेन्द्रियः ।
सप्तजन्मकृतात् पापात् मुच्यते नात्र संशयः ॥"

इति तिथ्यादितत्त्वम् ॥

सप्तधातवः, पुं,(सप्तगुणिता धातवः ।) शरीरस्थसप्तसंख्यकधातवः । तद्यथा,—

"रसासृमांसमेदोऽस्थिमज्जानः शुक्रसंयुताः ।
शरीरस्थैर्यदा सम्यक् विज्ञेयाः सप्तधातवः ॥"

इति राजनिर्घण्टः ॥

सप्तनाडीचक्रं, क्ली,(सप्तनाडीनां चक्रम् ।) वृष्टिज्ञानार्थं ग्रहनक्षत्राङ्कितसप्तनाडिकसर्पाकारचक्रम् । यथा । अथ सप्तनाडीचक्रम् ।

"अथातः संप्रवक्ष्यामि यच्चक्रं सप्तनाडिकम् ।
येन विज्ञानमात्रेण वृष्टिं जानन्ति साधकाः ॥
कृत्तिकादीनि ऋक्षाणि साभिजिन्ति क्रमेण च ।
सप्तनाड्यध्यधस्तत्र कर्त्तव्यः पन्नगाकृतिः ॥
ताराचतुष्कवेधेन नाडिकैका प्रजायते ।
तासां नामान्यहं वक्ष्ये तथा चैव फलानि च ॥
कृत्तिका च ३ विशाखा च १६ मैत्राख्या १७ भरणी २ तथा ।
ऊर्द्ध्वादौ शनिनाडी स्याच्चण्डनाम्नाभिधा मता ॥
रोहिणी ४ स्वाती १५ ज्येष्ठा १८श्विनी१द्वितीया नाडिका मता ।
आदित्यप्रभवा नाडी वायुनाडी तथैव च ॥
सौम्यम् ५ चित्रा १४ तथा मूलम् १९ पौष्णञ्च २७ चतुर्थकम् ।
तृतीयाङ्गारका नाडी दहनाख्या च सम्मता ॥
रौद्रम् ६ हस्तम् १३ तथा पूर्व्वाषाढ़ा २० भाद्रपदोत्तरा २६ ।
चतुर्थी जीवना नाडी सौम्यनाडी प्रकीर्त्तिता
पुनर्व्वसू ७ त्तरफल्गुन्यु-१२ त्तराषाढ़-२१ तारकाः ।
पूर्व्वभाद्रा च २५ शुक्राख्या पञ्चमी नीरनाडिका ।
पुष्यर्क्षम् ८ फल्गुनी पूर्व्वा ११ अभिजित् ० शततारका २४ ।
षष्ठी नाडी च विज्ञेया बुधाख्या जलनाडिका ॥
अश्लेषर्क्षम् ९ मघा १० विष्णु २२ र्धनिष्ठाभं २३ सदैव च ।
अमृताख्याहि सा चान्द्री सप्तमी चन्द्रनाडिका
मध्यनाडीस्थिता सौम्या नाडी तस्याश्च पृष्ठतः ।
सौम्ययाम्यगतं ज्ञेयं नाडिकानां त्रिकं त्रिकम् ॥
क्रूरा याम्यगता ज्ञेया सौम्या सौम्यदिशिस्थिता
मध्यनाडी च मध्यमा ग्रहरूपफलप्रदाः ॥
एकनाडीगता ह्याद्या ग्रहाः क्रूराः शुभा यदि
ततो नाडीफलं वाच्यं शुभं वा यदि वाशुभम् ॥
ग्रहाः कुर्य्युर्म्महावातं गताश्चण्डाख्यनाडिकाम् ।
वायुनाडीगता वायुं दहनाश्चाभिदाहकाः ॥
सौम्यनाडीगता मध्या नीरस्था मेघवाहकाः ।
जलायां वृष्टिदश्चन्द्रश्चन्द्रनाडीगतास्तथा ॥
एकोऽपि तत् फलं दत्ते स्वनाडीसंस्थितो ग्रहः
भूसुतः सर्व्वनाडीषु दत्ते नाडीसमं फलम् ॥
प्रावृट्काले तु संप्राप्ते रौद्रऋक्षगते रवौ ।
नाडीवेधसमायोगे जलयोगं वदाम्यहम् ॥
यत्र नाडीस्थितश्चन्द्रस्तत्र स्युः खेचरा यदि ।
क्रूराः सौम्या विमिश्राश्च तद्दिने वृष्टिरुत्तमा ॥
एकऋक्षसमायोगो जायते यदि खेचरैः ।
तत्काले च महावृष्टिर्यावदस्तांशके शशी ॥
केवलैः सौम्यैः पापैर्व्वा ग्रहैर्व्विद्धो यदा शशी ।
तदा तु तुच्छपानीयं दुर्द्दिनञ्च भवेद्ध्रुवम् ॥
यस्य ग्रहस्य नाडीस्थश्चन्द्रमास्तद्ग्रहेण च ।
दृष्टो युक्तः करोत्यभ्रो यदि चोणी न जायते ॥
स्त्रियौ सितासितौ चैव गौरिसौम्यौ नपुंसकौ ।
पुरुषाः पुरुषैर्व्वायुः क्लीवौ तु बुधकारुणी ॥
स्त्रीपुरुषसमायोगे वृष्टिस्तु प्रबला भवेत् ॥
पीयूषनाडीगश्चन्द्रस्तत्र खेटाः शुभाशुभाः ॥
द्वियतुःपञ्च पानीयं दिनान्येकत्रिसप्तकम् ।
एवं जलाख्यनाडीस्थे चन्द्रमिश्रग्रहान्विते ॥
दिनार्द्धं दिवसं पञ्च दिनानि जायते जलम् ।
नीरनाडीस्थिते चन्द्रे ग्रहस्थैः पूर्व्ववद्ग्रहैः ॥
यामं दिनार्द्धकं त्रीणि दिनानि जायते जलम् ।
अमृतादि त्रिनाडीषु यदि स्युः सर्व्वखेचराः ॥
तत्र वृष्टिः क्रमाज्ज्ञेया ह्येकसप्तवासरान् ।
सौम्यनाडीगताः सर्व्वे वृष्टिदास्ते दिनत्रयम् ॥
शेषानाड्यां महाराज दुष्टवृष्टिप्रदा ग्रहाः ।
निर्ज्जला जलदा नाडी भवेद्योगो शुभाधिकः ॥
क्रूराधिकसमायोगे जलदाश्चापि निर्ज्जलाः ।
याम्यनाडीगताः क्रूरा अनावृष्टिप्रसूचकाः ॥
शुभयुक्ता जलाश्रयाश्चातिवृष्टिः शुभा ग्रहाः ।
एकनाडीसमायुक्तौ चन्द्रमोधरणीसुतौ ॥
यदि तत्र भवेज्जीवस्तदा वारिमयी मही ।
बुधशुक्रौ यदैकत्र गुरुणा च समन्वितौ ॥
चन्द्रयोगे तदा काले जायते वृष्टिरुत्तमा ।
जलयोगगतौ स्यातां यदा चन्द्रसितौ ग्रहौ ॥
क्रूरदृष्टौ युतौ वापि तदा मेघोऽल्पवृष्टिदः ।
उदयास्तगते मार्गे वक्रयुक्ते च संक्रमौ ॥
जलनाडीगतास्ते तु महावृष्टिप्रदा ग्रहाः ॥"

इति स्वरोदये सप्तनाडीचक्रम् ॥